“क्लिश्नन्निवास्य भुजमध्यमुरःस्थलेन” रघुः। अत्र मल्लिनाथः क्लिश्नन्निति पठित्वा क्लिश्नातिरयं सकर्म्मकः “क्लिश्नाति भुवनत्रयमिति दर्शनादिति व्याचख्यौ। तेन टीकापुस्तके क्लिश्यन्निति पाठः प्रामादिकएव।

उपसर्गविशेषात्तु तत्तदुपसर्गद्योत्यार्थयुक्ते बाधने।

परि+सर्व्वतोबाधने। “परिक्लिश्यमाने” पा०।

**क्लिशित** त्रि० क्लिश—क्त वा इट्। १क्लेशयुक्ते २उपतापिते च

**क्लिष्ट** त्रि० क्लिश-क्त वा इडभावः। १क्लेशयुक्ते २पीडिते च। २पूर्व्वापरविरुद्धार्थके वाक्ये न० अमरः

**क्लिष्टा** स्त्री क्लिष्टं क्लेशः अस्त्यस्याम् अच्। पातञ्जलोक्ते चित्तवृत्तिभेदे यथा

“वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः” सू०

“क्लेशहेतुकाः कर्म्माशयप्रचयक्षेत्रीभूताः क्लिष्टाः। ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः। क्लिष्टच्छिद्रेष्वप्यक्लिष्टा भवन्ति। अक्लिष्टच्छिद्रेषु क्लिष्टा इति। तथाजातीयकाः संस्काराः वृत्तिभिरेव क्रियन्ते संस्कारैश्च वृत्तय इति एवं वृत्तिसंस्कारचक्रमनिशमावर्त्तते तदेवम्भूतं चित्तमवसिताधिकारमात्मकल्पेनावतिष्ठते प्रलयं वा गच्छतीति। ताः क्लिष्टाश्च पञ्चधा वृत्तयः” भा०

“स्यादेतत् पुरुषो हि शक्ये, उपदिश्यते। न च वृत्तिनिरोधो वृत्तीरविज्ञाय शक्यो, न च सहस्रेणापि पुरुषायुषैरलमिमाः कैश्चित् परिगणयितुमसंख्यातास्च कथं निरोधव्या इत्याशङ्क्य तासामियत्तास्वरूपप्रतिपादनपरं सूत्रमवतारयति ताः पुनर्निरोद्धव्या बहुत्वे सति चित्तस्य वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः। वृत्तिरूपोऽवयव्येकः। तस्य प्रमाणादयोऽवयवाः पञ्च ततस्तदवयवाः पञ्चतय्यः पञ्चावयवा वृत्तिर्भवति ताश्च वृत्तयश्चैत्रमैत्रादिचित्त-भेदात् बह्व्य इति बहुवचनमुपपन्नम् एतदुक्तं भवति चैत्रो वा मैत्रो वा कश्चित्सर्व्वेषामेव तेषां वृत्तयः पञ्चतय्य एव नाधिका इति। चित्तस्येति चैकवचनं जात्यभिप्रायं चित्तानामिति तु द्रष्टव्यम्। तासामवान्तरविशेषमनुष्ठानोपयोगिनं दर्शयति। क्लिष्टाऽक्लिष्टा इति। अक्लिष्टा उपादेयाः क्लिष्टा निरोद्धव्यास्ता अपि परेण वैराग्येणेति। अस्य व्याख्यानम्। क्लेशहेतुका इति। क्लेशाः अस्मितादयो हेतवः प्रवृत्तिकारणं यासां वृत्तीनान्तास्तथोक्ताः। यद्वा पुरुषार्थं प्रधानस्य रजस्तमोमयीनां हि वृत्तीनां क्लेशकारित्वेन क्लेशैव प्रवृत्तिः क्लेशः क्लिष्टम् तदासामस्तीति क्लिष्टा इति। यत एव क्लेशोपार्ज्जनार्थममूषां प्रवृत्तिरत एव कर्म्माशयप्रचयक्षेत्रीभूताः प्रमाणादिकाः। खल्वयं प्रतिपत्त्यर्थमवसाय तत्र सक्तो द्विष्टो वा कर्म्माशयमाचिनोतीति भवन्ति धर्म्माधर्म्मप्रचयप्रसवभूमयो वृत्तयः क्लिष्टा इति अक्लिष्टा व्याचष्टे ख्यातिविषया इति। विधूतरजस्तमसो बुद्धिसत्त्वस्य प्रशान्तवाहिनः प्रज्ञाप्रसादः ख्यातिस्तया विषयिण्या तद्विषयं सत्त्वपुरुषविवेकमुपलक्षयति तेन सत्त्वपुरुषविवेकविषया यतः अतएव गुणाधिकारविरोधिन्यः कार्य्यकरणं हि गुणानामधिकारो विवेकख्यातिपर्य्यवसानञ्च त इति चरिताधिकाराणां तु गुणानामधिकारं विरुन्धति इति अतस्ता अक्लिष्टाः प्रमाणप्रभृतयो वृत्तयः। स्यादेतत् वीतरागजन्मादर्शनात् क्लिष्टवृत्तय एव सर्व्वे प्राणभृतां न च क्लिष्टवृत्तिप्रवाहे भवितुमर्हन्त्यक्लिष्टवृत्तयः। नचामूषां भावेऽपि कार्य्यकारिता विरोधिमध्यपातित्वात्। तस्मात् क्लिष्टानामक्लिष्टाभिर्निरोधस्तासां च वैराग्येण परेणेति मनोरथमात्रमित्यत आह। क्लिष्टप्रवाहेति। आगमानुमानाचार्य्योपदेशपरिशीलनलब्धजन्मनी अभ्यासवैराग्ये क्लिष्टच्छिद्रान्तरे तत्र पतिताः स्वयमक्लिष्टाएव यद्यपि क्लिष्टप्रवाहपतिताः। न खलु शिशालग्रामे किरातशतसङ्कीर्णे प्रतिवसन्नपि ब्राह्मणः किरातो भवति। अक्लिष्टच्छिद्रेष्विति निदर्शनम्। क्लिष्टान्तर्वर्त्तितया च क्लिष्टाभिरनभिभूता अक्लिष्टाः स्वसंस्कारपरिपाकक्रमेण क्लिष्टा एव तावदभिभवन्तीत्याह तथाजातीयका इति। अक्लिष्टाभिर्वृत्तिभिरक्लिष्टाः संस्कारा इत्यर्थः। तदिदं वृत्तिसंस्कार, चक्रमनिशमावर्त्तते आनिरोधसमाधेः तदेवंभूतञ्चित्तं निरोधावस्थं संस्कारशेषं भूत्वात्मकल्पेनावतिष्ठत इत्यापाततः। प्रलयं वा गच्छतीति परमार्थतः। पिण्डीकृत्य सूत्रार्थमाह। ता इति पञ्चधेत्यर्थकथनमात्रं न तु शब्दवृत्तिव्याख्यानं तयपः प्रकारेऽस्मरणात्। ताः स्वसंज्ञाभिरुद्दिशति” विव०

“प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः” सू०

“निर्द्देशे यथावचनं विग्रहस्यार्थे द्वन्द्वसमास इतरेतरयोगः। यथाऽनित्याऽशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येत्युक्तेऽपि न दिङ्मोहालातचक्रादिविभ्रमा व्युदस्यन्ते। एवमिहापि प्रमाणाद्यभिधानेऽपि वृत्त्यन्तरसङ्ख्यावशङ्कां न व्युदस्येति तन्निरासाय वक्तव्यं पञ्चतय्य इति एतावत्य एव वृत्तयोनापराः सन्तीति दर्शितं भवति” विव०

**क्लिष्टि** स्त्री क्लिश-क्तिन्। १क्लेशे २सेवायां च धरणिः।